शर्करोदकं, क्ली, (शर्करायुक्तमुदकम् ।) शर्करायुक्तजलम् । चिनिरपाना इति शरवत् इति च भाषा । यथा,—
"जलेन शीतलेनैव घोलिता शुभ्रशर्करा ।
एलालवङ्गकर्पूरमरिचैश्च समन्विता ॥
शर्करोदकनाम्नैतत् प्रसिद्धं विदुषां सुखे ।
शर्करोदकमाख्यातं शुक्रलं शिशिरं सरम् ॥
बल्यं रुच्यं लघु स्वादु वातपित्तास्रनाशनम् ।
मूर्च्छाच्छर्दितृषादाहज्वरशान्तिकरं परम् ॥"
इति भावप्रकाशः ॥

शर्द्धः, पुं, (शृधु शब्दकुत्सायाञ्च + घञ् ।) अपानोत्सर्गः । शृधधातोर्घञ्प्रत्ययेन निष्पन्नमेतत् ॥ (तेजः । यथा, ऋग्वेदे । ४ । १ । १२ ।
"प्र शर्द्ध आर्त्त प्रथमं विपन्या ॥"
"शर्द्धस्तेजः ।" इति तद्भाष्ये सायणः ॥
समूहः । यथा, तत्रैव । १ । ६४ । १ ।
"वृष्णे शर्द्धाय सुमखाय वेधसे ।"
"शर्द्धाय समूहाय ।" इति तद्भाष्ये सायणः ॥
प्रसहनशीले, त्रि । यथा, तत्रैव ।१।३७।४।
"प्रवः शर्द्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे ।"
"शर्द्धाय प्रसहनशीलाय।" इति तद्भाष्ये सायणः ।)

शर्द्धंजहः, पुं. (शर्द्धं जहातीति । हा + "एजेः खश् ।" ३ । २ । । २८ । इत्यत्र । "वातशुनीतिलशर्द्धेष्विति ।" खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) माषः : यथा ।
शर्द्धं आर्द्रत्वं जहाति इति शर्द्धंजहो माषः ।
इति मुग्धबोधव्याकरणटीकायां दुर्गादासः ॥

शर्द्धनं, क्ली, (शर्द्ध + ल्युट् ।) अधोवायुः । इति मनुटीकायां कल्लूक-भट्टः ॥ वातकर्म्म इति भाषा ॥

शर्ब्ब, हिंसे । गतौ । इति कविकल्पद्रुमः ॥ शर्ब्बति । इति दुर्गादासः ॥

शर्म्म, [न्] क्ली, (शॄ + "सर्व्वधातुभ्यो मनिन् ।" उणा० ४ । १४४ । इति मनिन् ।) सुखम् । इत्यमरः ॥ (यथा, ऋग्वेदे । ४ । २५ । ४ ।
"तस्मा अग्निर्भारतः शर्म्म यंसत् ।"
"शर्म्म सुखम् ।" इति तद्भाष्ये सायणः ॥ यथाच कथासरित्सागरे । ७८ । ४६ ।
"स्वामिभक्तस्तदेतस्य शर्म्मोपायमिमं ब्रज ॥")
सहति, त्रि ॥ गृहम् । इति निघण्टुः । ३ । ४ ॥ यथाच ऋग्वेदे । ३ । १३ । ४ ।
"स नः शर्म्माणि वीतयेऽग्निर्यच्छतु शन्तमा ।"
"शर्म्माणि शर्म्मशब्दो गृहवाची छाया शर्म्मेति तन्नामसु पाठात् ।" इति तद्भाष्ये सायणः ।)

शर्म्मा, [न्] पुं, (शृणात्यशुभमिति । शॄ + "सर्व्वधातुभ्यो मनिन् ।" उणा० ४ । १४४ । इति मनिन् ।) ब्राह्मणस्योपाधिविशेषः । यथा,—
"शर्म्मन्नर्घ्यादिके कार्य्ये शर्म्मा तर्पणकर्म्मणि ।
शर्म्मणोऽक्षय्यकाले च पितॄणां दत्तमक्षयम् ॥"
शर्म्मन्नित्यनेन गोत्रसम्बन्धनामानि पितॄणां परिकल्पयन्नित्येकवाक्यतया शर्म्मान्तं नाम प्रतीयते । तथा च विष्णुपुराणम् ।
"ततश्च नाम कुर्व्वीत पितैव दशमेऽहनि ।
देवपूर्व्वं नराख्यं हि शर्म्मवर्म्मादिसंयुतम् ॥"
देवात् पूर्व्वं नराख्यं नरनाम तच्च विशिष्टं शर्म्मयुतम् । एतच्च विप्रपरम् ।
"शर्म्मा देवश्च विप्रस्य वर्म्म त्राता च भूभुजः ।
भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत् ॥"
इति यमवचनात् ॥
अत्र चकारेण देवशर्म्मणोः समुच्चयः । अत्रापि शर्म्माद्यन्ततामाह शातातपः ॥
"शर्म्मान्तं ब्राह्मणस्य स्याद्वर्म्मान्तं क्षत्रियस्य च ।
धनान्तञ्चैव वैश्यस्य दासान्तं चान्त्यजन्मनः ॥"
इति आह्निकतत्त्वम् ॥
(तथा च विष्णुपुराणे । ३ । १० । ८—९ ।
"ततश्च नाम कुर्व्वीत पितैव दशमेऽहनि ;
देवपूर्व्वं नराख्यं हि शर्म्मवर्म्मादिसंयुतम् ॥
शर्म्मेति ब्राह्मणस्योक्तं वर्म्मेति क्षत्रसंश्रयम् ।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ॥"
"दशमेऽहनि अतीते इति शेषः । तच्चाशौचान्तोपलक्षणम् । अत्रैव कालान्तरमप्याह । यथा,—
'नामधेयं दशम्याञ्च केचिदिच्छन्ति पार्थिव ।
द्वादश्यामथवा रात्र्यां मासे पूर्णे तथापरे ॥'
इति ॥
देवपूर्व्वं कुलदेवतानामपूर्व्वकं कुलदेवतासम्बन्धं नाम कुर्य्यात् इति शङ्खोक्तेः । नराख्यं पुरुषवाचकम् । तच्च प्रान्त शर्म्मवर्म्मादिसंयुतम् । यथा, सोमशर्म्मा इन्द्रवर्म्मा चन्द्रवर्म्मा चन्द्रगुप्तः शिवदासः इत्यादि ।" इति तट्टीकायां स्वामी ॥
"तत्रादौ नाम निर्णयः ।
'शर्म्मेति ब्राह्मणस्योक्तं वर्म्मेति क्षत्रसंश्रयम् ।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ॥"
इत्यत्रेति पदस्वरसेन यद्यपि शर्म्मपदात्मकमेव नामावगम्यते तथापि तावन्मात्रं न नाम किन्तु तदन्नामेति निर्णीयते द्व्यक्षरं चतुरक्षरं इत्यादि गृह्यदर्शनात् । एवञ्च हरिशर्म्मा नारायणशर्म्मेत्यादि सिध्यति शर्म्मपदमात्रात्मकत्वात् तन्नाम्नश्चतुरक्षरता न स्यादेव । तथाच नारायणादिपदशर्म्मपदाभ्यां निर्णीतमेव नाम दशाक्षरादिकन्तु शर्म्मपूर्व्वप्रतीकमात्रमेव अतएव दानादौ नामोच्चारणे चैत्रशर्म्मणे इत्येव श्रूयते । गोभिलः ।
'शर्म्मन्नर्घ्यादिके कार्य्ये शर्म्मा तर्पणकर्म्मणि ।
शर्म्मणोऽक्षय्यकाले स्यादेवं कुर्व्वन्न मुह्यति ॥'
इदमप्युत्तरप्रतीकमात्रपरमुक्तयुक्त्या सर्व्वैकमूलत्वात् । एतेन शर्म्म सुखनीयमिति कर्कदर्शनात् । शर्म्मपदमर्थपरं तेन शुभङ्करेत्यादेव नामेत्यपास्तं गोभिलविरोधात् । कर्कन्तु पूर्व्वप्रतीकमात्रपरम् । तेन शुभङ्करशर्म्मा भीमशर्म्मेत्यादि सिध्यति एवञ्च छन्दोगानां चैतादृशमेव नाम तेषां प्रयोज्यम् । अपवादकाभावादिति । अत्रैव मनुः ।
'मङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम् ।
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ॥
शर्म्मवद्ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितम् ।
स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम् ।
मङ्गल्यं दीर्घवर्णान्तमाशीर्व्वादाभिधानवत् ॥'
शर्म्मवर्म्मप्रभृतीनि उत्तरपदानि कार्य्याणीति मनुटीकापि । स्त्रीनाम तु यशोदादेवीत्यादि स्त्रीणां दान्तमित्यपि पूर्व्वप्रतीकमात्रपरम् । वैश्यस्य शुभान्तमिति तु पराशरः । एवञ्च दानादौ चैत्रशर्म्मणे ब्राह्मणायेत्यादि स्वरूपं वाक्यम् ॥" इति द्वैतनिर्णयः ॥ * ॥)

शर्म्मरः, पुं, वस्त्रभेदः । इति धरणिः ॥

शर्म्मरा, स्त्री, दारुहरिद्रा । इति धरणिः ॥

शर्य्या, स्त्री, रात्रिः । यथा,—
"त्रियामा शर्व्वरी शर्य्या क्षयणी क्षणदा क्षपा ।"
इति भरतधृतवाचस्पतिः ॥
(इषुः । यथा, ऋग्वेदे । १ । १४ । ४ :
"शर्य्यामसना मनुहून् ।" "शर्य्या इषवः शरमय्यः । इति यास्कः ॥" इति तद्भाष्ये सायणः ॥
अङ्गुलिः । यथा, तत्रैव । ९ । ११० । ५ ।
"शर्य्याभिर्न्नभरमाणोगभस्त्योः ।"
"शर्य्याभिरङ्गुलीभिः ।" इति तद्भाष्ये सायणः ॥)

शर्य्यातिः, पुं, वैवस्वतमनुपुत्त्रः । तस्य पुत्त्र आनर्त्तः । यथा,—
"आनर्त्तो नाम शर्य्यातेः सुकन्या नाम दारिका ॥
आनर्त्तस्याभवत् पुत्त्रो रोचमानः प्रतापवान् ।
आनर्त्तो नाम देशोऽभून्नगरी च कुशस्थली ॥"
इति मात्स्ये १२ अध्यायः ॥
(अस्य विशेषविवरणं भागवते । ८ । १३ । एवं ९ । १ । अध्याये च द्रष्टव्यम् ॥)

शर्व्व, हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) शर्व्वति । इति दुर्गादासः ॥

शर्व्वः, पुं, (शृणाति सर्व्वाः प्रजाः संहरति प्रलये संहारयति वा भक्तानां पापानि । शॄ + "कॄगॄशॄदॄभ्यो वः ।" उणा० १।१५५। इति वः ।) शिवः । इति हेमचन्द्रः ॥ (यथा, रघुवंशे । ११ । ९३ ।
"कतिचिदवनिपालाः शर्व्वरीः शर्व्वकल्पः ।")
दन्त्यसादिरप्ययम् । विष्णुः । यथा,—
"शर्व्वः सर्व्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।"
इति तस्य सहस्रनामस्तोत्रम् ॥

शर्व्वरं, क्ली, तमः । कन्दर्पः । इति संक्षिप्तसारोणादिवृत्तिः ॥

शर्व्वरी, स्त्री, (शृणाति चेष्टामिति । शॄ + "कॄगॄशॄवृञ्चतिभ्यः ष्वरच् ।" उणा० २ । १२३ । इति ष्वरच् । षित्वात् ङीष् ।) रात्रिः । इत्यमरः ॥ (यथा, ऋग्वेदे । ५ । ५२ । ३ ।
"अतिस्कन्दन्ति शर्व्वरीः ॥")
योषित् । इति मेदिनी ॥ हरिद्रा । इति विश्वः ॥ सन्ध्या । इति संक्षिप्तसारोणादिवृत्तिः ॥

शर्व्वला, स्त्री, तोमराख्यम् । इत्यमरटीकायां रायमुकुटः ॥ दन्त्यसादिरप्ययम् ॥

शर्व्वाणी, स्त्री, (शर्व्वस्य भार्य्या । "इन्द्रवरुण-भवेति ।" ४।१।४९ । इति ङीष् ।) पार्व्वती ।